Shri Raghunath Temple MSS. Library,
JAMMU

No. १३५०

Title क. आकाशवादः ख. भावप्रत्ययः
ग. ईश्वरवादः घ. दण्डघटकार्यकारणवादः

Author x

Extent १९ Age x

Subject ११ न्याय वैशेषिकं

क. ख्याकाप्रावाद:

ख भावप्रत्यय

ग ईश्वरवाद:

घ दण्ड्यूटकार्यकारणवा

१३५०

१८ पत्रे

आकांक्षावादः
भावप्रत्ययार्थवादः
ईश्वरवादः
दंडघटकार्यकारणता
विचारः

नम्बर ६३५० पत्रे २५

आक° वा°

१

॥ अथ शब्दो द्रव्याश्रितो गुणत्वात् भावकार्य्यतात्वात् उत्पन्नमानादेव पृथिव्यादिवाधेन अतिरिक्ताकाशसिद्धिरिति चेत् अ
त्र भट्टाचार्य्यानुयायिनः । तदनुमानेन प्रमाणान्तरासिद्धतया भगवदात्मन एव शब्दसमवायित्वसिद्धिरितिरिक्तद्रव्यक
ल्पने मानाभावाद्गौरवाच्च । श्रोत्रमपि कर्णशष्कुलिविवरावच्छिन्नभगवदात्मैव च केवलं कर्णशष्कुलीविवरमेव वा अव
च्छिन्नतासंबन्धेन च शब्दग्राहकत्वात् । अस्समवायसन्निकर्षेण शब्दग्रह इति प्रवादस्यान्यायादेयत्वात् । न च भगवदात्म
नो वा शब्दसमवायित्वं जीवात्मनो वा उत्पत्त्र विनिगमनाविरहः । जीवात्मनानात्वेपि प्रत्येकमादाय विनिगमनाविरह
स्य दुर्वारत्वादिति वाच्यं । जीवात्मनां शब्दाधारत्वे अहं सुखी अहं दुःखीत्यादि मानस त्वं प्रतीत्य लौकिकप्रत्यक्ष
वदहं शब्द नित्यपि मानसलौकिकप्रत्यक्षं स्यात् । उत्पत्तिप्रसंगस्यैव विनिगमकत्वात् । भावनादृष्टादिवत् । शब्द एम° १
स्यापि अयोग्यत्वकल्पने मानसप्रत्यक्षप्रतिशब्दत्वेनापि अतिरिक्तप्रतिबंधकत्वकल्पनापत्तेः । न च संस्कारादृ

श्रि ष्टनिष्ठमानसंस्प्रतिबंधकतावच्छेदकवैजात्यमेवशब्दसाधारणकत्त्यतदतिरिक्तप्रतिबंधकत्वकल्पनमिति वा
च्यं। तथापि अनंतशब्देषु तादृशवैजात्याकारताकल्पनागौरवं च स्फुटमेवोपत्त्वात्। तद्वैजात्यस्य शब्दनिष्ठत्वे ज्ञानादिना
शकतावच्छेदकयोगपद्यविभुविशेषगुणत्वमादाय सांकर्यप्रसंगाच्च। योग्यविभुविशेषगुणत्वस्य संस्कारव्याप्यत्वा
त्। अन्यथा संस्कारादेरपि तद्गुणद्वयमात्रावस्थायित्वापत्तेः। अपात्मसमवेतमानसं द्विविधं जातिमानसं आ
त्मसमवेतमानसं च तत्र तावदाद्यस्य न तत्र संभवः जातिप्रत्यक्षं प्रति जातित्वेन कारणत्वात्। तादृशाकार्यकारणा
भावस्य चेन्द्रः संयुक्तसमवायादेः सन्निकर्षानंगीकर्तॄणां स्वतंत्राणां न च धर्माधर्मादीनां मानसप्रत्यक्षं प्रतिप्र
तिबंधकत्वानंगीकर्तॄणां नव्यानां नये चावश्यकत्वात्। व्यासज्यवृत्तित्रिगुणमानसावसर एव प्रपंचितं। नापि द्वि
तीयस्य तत्र संभवः। धर्माधर्मादीनां मानसप्रत्यक्षं प्रतिबंधकत्वानंगीकर्तॄनये आत्मविशेषगुणमानसं प्र

श्रा॰ का॰
२

तिज्ञानसुखदुःखेच्छाद्वेषप्रयत्नमात्रवृत्तियोग्यात्मविशेषगुणत्वस्यैकजातिमत्त्वेन निष्ठतयातादात्म्यसंबंधेनकारणत्वा
त्तादृपितत्वैवप्रपंचितं। न च तथापि शब्दवृत्तिजातेर्मानसप्रत्यक्षहेतुत्वापत्तिरितिवाच्यं धर्मत्वादिजातीनां मानसवारणा
यसमवेतमानसप्रतिसमवेतत्वसंबंधेन निरुक्तयोग्यात्मविशेषगुणस्यमवंनः संयुक्तसमवेतसमवायस्यसन्निकर्ष
त्वानंगीकर्तृणां नव्यानां नये जातिमानसप्रत्याश्रयमानसस्यवाहेतुत्वादिति चेदेवं विषयतादिरेभगवदात्मवज्जीवात्मना
मपिशब्दसमवायिवृत्तित्वप्रदृष्टत्वात्। नैवं अनंतानुव्यक्तिषु शक्त्याधारत्वकल्पनामपेक्ष्य निखिलशब्दाधारतयैकद्रव्यक
ल्पनेनैवलघीयसीतिवाच्यं। अस्यशिष्यः नमात्रत्वात्। तत्वापि शब्दसमवाय्यधिकरणतयाकृती —— नानेषु अनंततत्वा
मुद्रव्यसंबंधस्यकल्पनीयतयामहद्गौरवमितिवाच्यं। एतेन शब्दसमानसत्वापत्त्यामास्तु जीवात्मभिः समं विनिगमनावि एम॰
रहः। तथापि प्रत्येकमनोव्यक्तिमादायविनिगमनाविरहोदुर्वारः। न च मनसः शब्दसमवायित्वे मनोदंड्याविद्यातादिरेवशब्दा २

समवायिकारणं स्यात्तज्जन्यं न संभवति । न च मनसो विभुत्वाभावेन तेषां द्वंद्वाभिघातासंभवात् । मे[illegible]ः सन्निधौ नियमतो मनसः स
त्वे मानाभावादिति वाच्यं । भावकार्याणां समवायिकारणकत्वस्याप्रयोजकतया शब्दस्यासमवायिकारणानभ्युपगमेपि तत्त
ति विरहात् । निमित्तपवनद्वंद्वसंयोगभेरीदंडाभिघातादेर्निमित्तकारणविधयेत्यत्र तत्कालपदमिच्छादिपूर्ववृत्तित्वात्मकस्य
त्वकालत्वपर्यंतं तथा च बलवद्द्वेषस्याव्यवहितपूर्वमसत्त्वेपि न क्षतिरिति न वाच्यं । तस्य हेतुत्वे मानाभावात् । बलवद्द्वेषनाश्यत्वेन बाधका
भावेनेष्टोत्पत्तेः स्वीकारात् । अन्यथा बलवद्द्वेषनाशे सति त्रिचतुःपंचक्षणानंतरमपि नेष्टाभावतद्दुःखस्यापि सत्त्वात् ।
विशिष्य तत्तन्नियमस्य स्वर्गसाध्य इति । न च तथापि यत्रादावपेक्षाबुद्ध्यात्मकं नरकसाधनसुखसाधनत्वविषयकं समू
हालंबनज्ञानं ततः क्रमेण नरकचत्वबलवत्सुखेच्छा तत्रापेक्षाबुद्धेः क्षणत्रयावस्थायितया चतुर्थक्षणे द्वेषावारणाय तद्धेतु
त्वमावश्यकमिति वाच्यं । तत्र तृतीयक्षणे द्वित्वादिसाक्षात्कारानुत्पत्त्या तदपेक्षाबुद्धेः क्षणद्वयावस्थायित्वासंभवात् । न च तथा
पि युगपत्सुखेच्छाबलवद्द्वेषो ततो नरकसाधनत्वसुखसाधनत्वविषयकसमूहालंबनज्ञानं तत्रेच्छावारणाय तद्धेतुत्वमावश्य

गा॰ का॰ बा॰

कमितिवाच्यं। द्वेषोद्देश्ययोर्यौगपद्याभावात्। नन्वेवं यदि तत्तीयत्तोद्दित्यादेः साक्षात्कारानुत्पादे पितदुपधायकापेक्षाबुद्धेः तत्राव्याव
स्यापि त्वं द्वेषोद्देश्ययोर्यौगपद्यं वाभ्युपगम्यते तदा तद्धेतुत्वमावश्यकमितिवाच्यं। तस्य हेतुत्वे मानाभावात्। किंतु तादृशस्थलविशेषी
यसमूहालंबनव्यक्तिरेव दुःखजनकत्वनिष्ठप्रकारतानिरूपितविशेष्यतावच्छेदकताप्रत्यासत्त्या प्रकारतासंबंधेन तत्पुरुषीयद्व
ष्टत्वावच्छिन्नं प्रति प्रतिबंधकता। एकस्मिन्नेव काले समनियतानंतु कालोपाधिसत्त्वात्। विनिगमनाविरहेण प्रतिपुरुषं प्रति
पुरुषं कालोपाधिभेदात्। पुरुतरानंतकार्यकारणभावकल्पनामपेक्ष्य कतिपयज्ञानव्यक्तीनां तत्तद्व्यक्तित्वेन प्रतिबंधकताकल्प
नानम्युत्वात् तदुत्पादुः। अन्ये तु तादृशस्थलविशेषद्वेषाचारणायलाघवात्। समानप्रकारताप्रत्यासत्त्या बलवद्द्वेषं एव कार्य्यसह
वर्त्तित्वेन दुःखप्रतिबंधकः। फलगोचरे बलवद्द्वेषविषयसाधनताज्ञानयोः सत्वोपायगोचरबलवद्द्वेषस्यावश्यकत्वात्। न चैवं
सुखादौ सुखत्वादिप्रकारकबलवद्द्वेषविषयदुःखजनकत्वभ्रमदशायां सुखत्वादिप्रकारेण सुखादाविच्छापत्तिः। सुखदुः एम॰
खाभावयोर्द्वेषस्वरूपयोग्यतया कार्य्यसहवर्त्तित्वेन बलवद्द्वेषस्य तत्र प्रतिबंधकत्वासंभवादितिवाच्यं। दुःखत्वात्। प्राचीनैरपि २

वत्त्ववद्द्वेषविषयपदुःखाजनकत्वज्ञानस्यऽपायेच्छाप्रतिहेतुत्वाभ्युपगमेन सुखत्वाप्रकारकइच्छायाऽवृत्वात् । सामान्यतो
विशेष्यतावच्छेदकतापत्त्यासत्त्वावत्त्ववदिच्छासाधनताज्ञानस्यवत्त्ववद्द्वेषंप्रतिहेतुत्वेन सुखदुःखाभावयोरपिवत्त्ववद्द्वेषसं
भवाच्चेतिप्राहुः केचित्तुवत्त्ववद्द्वेषोपिनप्रतिबंधकः ॥ [illegible] नतुत्वतत्त्वादिभावप्रत्ययस्यकेनरूपेणश
क्तिरितिचेदत्रप्राचः । धर्मित्वरूपेणधर्मी एवतस्यशक्तिः तस्यचवाच्यता । धर्मित्वमधेयत्वेशक्यतावच्छेदकंचप्रत्येकंत्वतलत्वादि
कमेव । नतुसामान्यतोभावप्रत्ययत्वमनुगतस्यतस्यदुर्वचत्वात् । तेनरूपेणज्ञानेपित्वतल्प्रकारकज्ञानाच्छाद्वबोधोदयाद्व
। घटत्वमित्यादौ घटवृत्तिधर्मः पटवृत्तिधर्मइत्यादाविवप्रकृतिप्रत्ययाभ्यामन्वयबोधः । धर्मित्वरूपेणप्रकृत्यर्थतावच्छे
दकधर्ममात्रबोधकत्वव्युत्पत्त्यैवघटत्वपटत्वमित्यादिरूपधर्मिविशेषमात्रलाभः । नचैवंपरेषुघटत्वंनास्तीतिव्यवहारा
विरोधः घटवृत्तिधर्मएवद्रव्यत्वादेस्तत्रसत्वात् । अनुमितावच्छेदकावच्छिन्नप्रतियोगिताकत्वस्यव्युत्पत्तिवत्त्वस्यतयाघ
टत्वादिरूपप्रकृत्यर्थताधर्मावच्छेदकमात्रप्रतियोगिकाभावस्यबोधयितुमशक्यत्वादितिवाच्यं त्वतलादिभावप्रत्ययेस

२२११९९

समभिव्याहृतनञा प्रकृत्यर्थतावच्छेदकविशिष्टधर्मत्वावच्छिन्नप्रतियोगिताकाभावो बोध्यते। इति व्युत्पत्त्या व्यवहारोपपत्तेः नीलो
त्पलत्वं राजपुरुषत्वमित्यादिसमासस्थलेपि धर्मत्वरूपेण प्रकृत्यर्थतावच्छेदकमुत्पलत्वपुरुषत्वादिकमेव भावप्रत्ययो बोधयति
ति। नीलाभिन्नोत्पलवृत्तिधर्मः। राजसंबंध्यभिन्नपुरुषवृत्तिधर्म इत्यादिरेव प्रकृतिप्रत्ययाभ्यामन्वयबोधः। न चैवं रक्तोत्पलादाव
पि नीलोत्पलत्वपुरु[illegible]दिव्यवहारापत्तिः प्रकृत्यर्थतावच्छेदकस्योत्पलत्वादेस्तत्रापि सत्वात् इति वाच्यं। कर्मधारयषष्ठीतत्पुरुषा
द्युत्तरभावप्रत्ययसमभिव्याहृतप्रत्ययादेः प्रकृत्यर्थवृत्तित्वविशिष्ट धर्मत्वावच्छिन्ननिरूपितसंबंधिताबोधकतया तत्र व्यव
हारविरहात्। वस्तुतस्तु कर्मधारयादिसमासोत्तरभावप्रत्ययस्याधेयतासंबंधेन पूर्वपदार्थतावच्छेदकविशिष्टोत्तरपदार्थता
वच्छेदके निरूढलक्षणा। एवं च नीलोत्पलत्वमित्यादि नीलाभिन्नोत्पलवृत्ति नीलविशिष्टोत्पलत्वमित्यादिरेव प्रत्ययार्थमन्वयबोधः र्था
पि एवं पक्वत्वं भोक्तृत्वमित्यादि कृत्प्रत्ययोत्तरभावप्रत्ययस्यापि विषयित्वादिसंबंधेन पूर्वपदार्थतावच्छेदके निरूढलक्षणा पाकक ण०
र्तृवृत्तिपाकविशिष्टाकृतिरित्येव प्रकृतिप्रत्ययाभ्यामन्वयबोधः अत एव हि घटत्वमौपगवत्वमित्यादि तद्धितोत्तरभावप्रत्ययस्या ४

व

प्रकृ.गा.२

पिनिरूपितत्वादिसंबंधेन पूर्वपदार्थविशिष्टे ऽन्तरपदार्थतावच्छेदके निरूढलक्षणा घटसंबंधिनि घटविशिष्टः संबंधः

ऽपगमप्रत्ययस्त्रि ऽपग। विशिष्टमप्रत्ययार्थमित्यादिरेव प्रकृतिप्रत्ययाभ्याम् मन्वयो बोधः । अन्यत्रापरपदार्थतावच्छेदके संबं

धावगमः पूर्वपदार्थस्य संबंधावगमश्चाऽऽधितितदर्थादित्याद्युः । तदसत् अननुभवापत्त्यापातात् । घटत्वपटत्वमित्यादौ घटत्वत्वपटत्व

त्वरूपेण बोधस्येव सर्वानुभवसिद्धत्वात् । कदाचिद्धर्मत्वप्रकारकबोधसत्त्वेपि तस्यास्वारसिकत्वात् । तथैवानुभवात्सांप्रदायिका

ल नां त्वतलादिभावप्रत्यययोर्नानार्थः प्रत्येकघटत्वत्वपटत्वादिकसमवेतस्य शक्यतावच्छेदकं प्रामाणिकगौरवस्यादोषत्वात् । न च घट

त्वपटत्वमित्यत्र घटवृत्तिघटत्वपटवृत्तिपटत्वमित्येव प्रकृतिप्रत्ययाभ्यामन्वयबोधः एवं सर्वत्रैव प्रकृत्यर्थवृत्तित्वस्य संसर्गमर्या

दया त्वपदार्थभाने ऽन्यपदसमभिव्याहारस्य प्रत्ययनियामकत्वाच्च घटवृत्तिघटत्वमित्यादौ पटत्वादिबोधः । घटत्वत्वं च घटेतर

मद सत्त्वे सति घटनिष्ठान्योन्याभावप्रतियोगितानवच्छेदकत्वे च सति समवेतत्वं एवं पटत्वत्वादिकमपि निर्वाच्यम् । अभावादावप्र गे

संगवारणाय समवेतत्वोपादानं न च घटेतरासमवेतत्वे सति सकलघटनिष्ठान्योन्याभावप्रतियोगितानवच्छेदकत्वादिरूपे

भावप्र॰ ॥

5

णप्रकृत्यर्थतावच्छेदकमेवबोधयति। नाघटेन्यादिति समभिव्याहृतव्युत्पत्त्या समवेतत्वसंबंधेनैव प्रकृत्यर्थस्य घटादेस्त्वपदार्थेऽन्व
यः इति व्युत्पत्त्यैव अभावादेर्बोधाऽसंभवात्। किं समवेतत्वस्य शक्यतावच्छेदकांतर्भावेतिवाच्यं। अभावादावतिव्याप्तिवारणाय ते
यतस्य घटत्व[illegible]त्वादिघटत्वावश्यकतया शक्यतावच्छेदकेपि तदंतर्भावस्यावश्यकत्वादन्यथा घटत्वमित्यादौ घटत्वत्वादिप्र
कारकबोधस्य सर्वानुभवसिद्धस्यापलापापत्तेः नचतादृशानुभवोऽसिद्ध इति वाच्यं। तथा सति सत्पतद्त्वस्यापि स्यार्थत्वापत्तेः
लाघवाद्धर्मत्वरूपेण शक्तिपक्षे स्येवोचितत्वापत्तेश्च। यदि च घटत्वत्वं द्विविधं। एकं घटत्वेतरभेदानुमापकत्वं अपरं च घटत्व
व्यवहारविषयतावच्छेदकत्वं तत्राद्ये। भावादौ दोषवारणाय समवेतत्वांतर्भावस्यावश्यकत्वेपि द्वितीये तदंतर्भावे मानाभावः
ऽकव्युत्पत्त्यैवाभावादौ अतिप्रसंग विरहात्। तत्र केचल घटेतरासमवेतत्वादावेव प्रकारत्वस्यानुभवसिद्धत्वादिति विभाव्यते।
तदा नांतर्भावनीयं शक्यतावच्छेदकं तदेव यमग्रेपि सर्वबोध्यं। सन्नेत्यत्र च सत्तात्वरूपेण सन्ने-वार्थः। सत्तात्वं तु सत्तिन्नान्योन्या रामः
भावप्रतियोगितानवच्छेदकत्वे सति समवेतत्वमात्रं। नतु तद्भिन्नत्वे समवेतत्वस्य प्रवेशो व्यर्थत्वात् प्रसिद्धत्वाच्च। प्रमेयत्वमित्यादावपि ५

प्रमेयत्वत्वादिरूपेण प्रमेयत्वादिकमेवार्थः । तथैवानुभवात् । प्रमेयत्वत्वं च प्रमानिरूपितविषयतात्वं च विषयतास्वरूपसंबन्धावि
शेषोऽतिरिक्तपदार्थो वा । न तु प्रमेयत्वनिष्ठान्योन्याभावप्रतियोगितानवच्छेदकत्वे सति विशेषणतासंबन्धेन वर्त्तमानत्वं आकाशाभा
वादौ वाच्यत्वादौ चातिव्याप्तेः । एतेन वाच्यत्वत्वादिकमपि व्याख्यातं । आकाशत्वमित्यत्रापि आकाशत्वत्वेन आकाशत्वमेवार्थः । तथैवा
नुभवात् आकाशत्वत्वं च शब्दत्वेनाकाशेतरासमवेतत्वे सति आकाशनिष्ठान्योन्याभावप्रतियोगितानवच्छेदकत्वे सति समवेत
त्वं । आकाशस्यैकत्वादावतिव्याप्तेः । कालत्वदिक्त्वमित्यत्रापि कालत्वत्वदिक्त्वत्वरूपेण कालत्वदिक्त्वमेवार्थस्तथैवानुभवा
त त् कालत्वत्वदिक्त्वत्वं च कालत्वादिवत् स्वरूपसंबन्धविशेषः । न तु कालेतरासमवेतत्वे सति त्वादिकं कालत्वादिप्रकारकप्रमाविशे
ष्यत्वादावतिव्याप्तेः । आत्मत्वमनस्त्वमित्यत्रापि आत्मत्वमनस्त्वरूपेण आत्मत्वमनस्त्वमेवार्थः । आत्मत्वत्वं मनस्त्वत्वं च आ
त्ममनोभिन्नासमवेतत्वे सति आत्ममनोनिष्ठान्योन्याभावीयपर्याप्तिविशेषावच्छिन्नप्रतियोगितावच्छेदकभिन्नत्वे च सति
समवायेन पर्याप्तत्वं सकलात्ममनोवृत्तित्वमेवेति व्याप्तिवारणाय पर्याप्तिविशेषावच्छिन्नत्वेत्यवच्छेदकताविशेषणं चरम

भा.सम.टी

6

पर्य्याप्तत्वोपादानात्। त्वानादेः पर्य्याप्त्यनभ्युपगमेपि नतत्रातिव्याप्तिः जातेस्तु पर्य्याप्तिरूपेयत एवासंभवः यदि च पर्य्याप्त्यर्थसंबं
धो नांगीक्रियत एव समवायसंबंधेन वक्तृत्वं च तोऽप्यन्योन्याभावो प्येकवृत्ती क्रियते। तद्धानोपादेयमेव पर्य्याप्तिविशेषावच्छिन्न
त्वं च रमपर्य्याप्तत्वं च महत्वं गुरुत्वं नीलत्वमित्यादौ महत्वत्वगुरुत्वत्वनीलत्वादिजातिप्रकारेण महत्वगुरुत्वनीलत्वरूपादिक
मेवार्थ इत्यादिकं स्वयमूह्यं। कर्मधारयादिसमासोत्तराभावप्रत्ययस्य चाभिधेयता संबंधेन पूर्वपदार्थविशिष्टमुत्तरपदार्थ
३ विशिष्टमुत्तरपदार्थतावच्छेदकमर्थस्तु जातिकस्त्रत्वयोत्तराभावप्रत्ययस्याविषयत्वादि संबंधेन पूर्वपदार्थविशिष्टमुत्तरप
दार्थतावच्छेदकं मतुवादितद्धितोत्तराभावप्रत्ययस्य त्वनिरूपितत्वादि संबंधेन पूर्वपदार्थविशिष्टमुत्तरपदार्थतावच्छेदक
मर्थः। कृत्तद्धितेत्यादिसूत्रे संबंधावगमपदस्य समासस्थले त्वर्थोक्तोपरपदार्थतावच्छेदकसंबंधाधिकरणे वृत्तित्र्यपरपदार्थता
वच्छेदकसामानाधिकरण्यसंबंधेन एकपदार्थतावच्छेदकसंबंधवानन्यपरपदार्थतावच्छेदकसंबंधो वार्थः कृत्तद्धितेत्यादिसू एम०
त्रे संबंधावगपदस्य समासस्थले यथोक्तोपरपदार्थतावच्छेदकसंबंधपरत्वात्। नीलोत्पलमित्यादौ नीलाभिन्नोत्पलवृत्तिनील ६

संबंधाधिकरणमुत्पलत्वसंबंधद्रूत्याकारकनीलाभिन्नोत्पलवृत्तिनीलत्वसंबंधसामानाधिकरण्यसंबंधेननीलत्वसंबंधक
त्पलत्वसंबंधद्रूत्याकारकोवान्वयबोधद्रूत्याङ्कः। किंचिन्तुकर्मधारयादिसमासोत्तरभावप्रत्ययस्यतत्तत्पदार्थतावच्छेदकद्वय
सामानाधिकरण्यत्वेनसमस्यमानपदार्थतावच्छेदकद्वयसामानाधिकरण्यमर्थः। कृत्तद्धितेत्यादिपाणिनिसूत्रेपिसमासस्य
लेसंबंधपदपदार्थतावच्छेदकद्वयसामानाधिकरण्यपरं एवंचनीलोत्पलत्वमित्यादौ। नीलाभिन्नोत्पलनिष्ठयोनीलत्वोत्पल
त्वयोः सामानाधिकरण्यमित्यन्वयनिष्ठतासंसर्गः। एवमग्रेपिभावप्रत्ययार्थैकदेशेपिप्रकृत्यर्थान्वयोव्युत्पत्तिवैचित्र्यात्।
नीलाभिन्नोत्पलनिष्ठं नीलत्वोत्पलत्वयोः सामानाधिकरण्यमितिवान्वयः निष्ठताचात्र एतयोः सामानाधिकरण्यमितिप्रती
तिसाक्षिकः स्वरूपसंबंधविशेषः। नचसामान्यतः सामानाधिकरण्यत्वेनसामानाधिकरण्यमेवार्थोस्तु किंतत्पदार्थतावच्छे
दकप्रवेशेनेतिवाच्यं। तथासतिनीलोत्पलत्वमित्यादौनीलोत्पलत्वयोः सामानाधिकरण्याभावादितरविशेषणत्वेनोपस्थि
तस्यपदार्थतावच्छेदकद्वयस्यसामानाधिकरण्यविशेषणत्वेनान्वयायोगात्। समस्यमानपदस्यनीलत्वोत्पलत्वयोर्लक्षणा

भा॰प्र॰टी॰

यांनीलोत्पलपदादभेदांसंभेदानु[illegible]भवापत्तापादित्याकूः। तदुभयमप्यसत् गौरवात् नीलोत्पलत्वमुत्पलसमवेतमिति वाक्यस्या
योग्यत्वप्रसंगात्। नीलोत्पलत्वमुत्पलत्वे इति वाक्यस्य योग्यत्वप्रसंगाच्च। कृत्तद्धितेत्यादिपाणिनिसूत्रविरोधप्रसंगाच्च। तत्र
कर्त्रादिसकलसाधारणतया संबंधावगमपदार्थतावच्छेदके एवं पदार्थसंबंधावगमपदस्योत्तरपदार्थतावच्छेदके एवं पदा
र्थसंबंधावगमपरतया एवसंदर्भशुद्धत्वात्। अन्येतु घटत्वत्वपटत्वत्वाद्यनंतरशक्यतावच्छेदककल्पने घटत्वादिघटकी
भूतवैशिष्ट्यानां शक्तिविषयत्वकल्पने गौरवात् लाघवेन सर्वत्र इतरद्वर्तमानमन्योन्याभावप्रतियोगित्वमवच्छेदकं च वि
शकलितानि पंचैव शक्यानि। एवकारव्युत्पत्तिवैचित्र्याच्च एकपदार्थस्यापि परस्परमन्वयबोधः। इतरान्योन्याभावयोश्च वा
रद्वयमन्वयः प्रकृतिपदार्थघटादेर्लाभः तस्यापि वारद्वयमन्वयः। तथा च घटमाकाशत्वमात्मत्वमित्यादौ सर्वत्रैव प्रकृतिप्र ल
त्ययार्थाभिलित्वा घटेतरवर्तमानभिन्नत्वे सति घटनिष्ठान्योन्याभावप्रतियोगितावच्छेदकेतरदित्यादिरीत्यान्वयबोधः। नतु राम॰
प्रकृत्यर्थघटादिहत्रित्वस्यापि भानं न वा समवेतत्वादीनां पृथगंतर्भावः। पृथक्तज्ज्ञानस्यान्वयासिद्धत्वात्। न चैवं घ १

ट्त्वमित्याद्याकाशत्वमित्याद्यावाकाशीकत्वादेश्वबोधापत्तेः तस्यापिताद्दशावच्छेदकेतरत्वादितिवाच्यं ताद्दशावच्छेदके
तरत्वरूपेणाप्रकृत्यर्थतावच्छेदकमेवबोधयति। नान्यदिति समभिव्याहारव्युत्पत्तेर्द्धर्मांतरनिरासात् नचैवंसत्यंतम
पित्यजनतामितिवाच्यं तत्प्रकारकबोधस्यानुभवसिद्धत्वात्। सत्त्वेत्यत्र सन्निष्ठान्योन्याभावप्रतियोगितावच्छेदकेतर
दित्येवान्वयः। सदितरावृत्तित्वस्याप्रसिद्धत्वादेवाभावात्। प्रकृत्यर्थतावच्छेदकबोधकत्वमात्रव्युत्पत्त्यैवाकाशभा
वादेस्ततोऽप्रत्ययः। नचतथापितत्तत्संबंधावच्छिन्नवर्त्तमानत्वावच्छेदकत्वयोर्घटत्वत्वादिघटकतयाकथमेकरू
पेणासर्वत्रशक्तिरितिवाच्यं। सामान्यतोवर्त्तमानत्वावच्छेदकत्वयोरेवशक्यतावच्छेदकत्वात्। येनसंबंधेनप्रकृत्यर्थता
वच्छेदकस्यभानंतत्तत्संबंधावच्छिन्नत्वस्यप्रतियोगिताकातत्वव्यक्तेस्वरूपतः संसर्गतयाभानाभ्युपगमेनघटत्वादेर्बा
धकाभावात्। तेनतत्समभिव्याहारस्यनियामकत्वाच्चनातिप्रसंगः। नचैवंघटेतरसमवेतत्वादिरूपेणघटेतरसमवेतत्वा
देर्घटत्वत्वादिघटकतयाघटत्वत्वादिप्रकारकानुभवापत्त्यापत्तेः। तद्रूपेस्यतद्धर्मत्वरूपेणाशक्तिपत्तस्यसम्यक्त्वादिः

भा०प०का० तिवाच्यं।तदनुरोधेनसामान्यतोघटेतरवृत्तित्वत्वादिनाघटेतरवृत्तित्वत्वादिनाघटेतरवृत्तित्वादेरेवघटत्वत्वादिघटकत्वा
त्।समवेतत्वावच्छिन्नत्वस्यप्रतियोगिताइतरव्यक्तेः स्वरूपतः संसर्गतयाघटत्वादेवघटत्वत्वादेर्बाधकाभावात्।न
चैतद्रीत्यांपंचानामेवशाक्यत्वंनीलत्वंगुरुत्वमित्यादौनीलरूपमहत्परिमाणादेः प्रतिव्यक्तिभिन्नतयाकुत्रापिनी
४
लरूपमहत्परिमाणादौनीलमहदादिनिष्ठान्योन्याभावप्रतियोगितानवच्छेदकत्वस्यासत्वात्।अनन्वयप्रसंगः।ए
वंतत्वमित्यादौघटत्वादिनानायक्तिसत्वात्कत—दादिशाब्दोत्तराभावप्रत्ययस्थलेप्यनन्वयप्रसंगइतिवाच्यं।तत्रविशे
षणत्वस्याप्रवेशात्।किंतुकेवलंनीलेतरावृत्तित्वादिप्रकारेणैवान्वयबोधात्।प्रकृत्यर्थतावच्छेदकत्वमात्रबाधकत्व
व्युत्पत्त्यैवनीलरूपाद्यतिरिक्तस्यततोऽप्रत्ययात्।अस्तुवातत्पंचकवदवच्छेदकत्वाश्रययोरपित्वयोः स्वदृशत्वप्र
त्ययादिशक्यतयातत्रनीलेतरावृत्तित्वेसतिनीलनिष्ठान्योन्याभावप्रतियोगितावच्छेदकतानवच्छेदकाश्रयइत्यादिरेवा राम०
न्वयबोधः।नीलत्वत्वादिसत्वाच्चतदादिशब्दोत्तरत्वंप्रत्ययादिस्थलेचावच्छेदकतायोश्चयोर्वारूढयमन्वयः।तथाचनील ८

वदितरावृत्तित्वे सति नीलवन्निष्ठान्योन्याभावप्रतियोगितावच्छेदकतानवच्छेदकाश्रयाश्रय इत्यन्वयबोधः। एवमवच्छे-
दत्वाश्रययोरैकैकान्वयबुद्ध्या नीलादिसद्भावचकतद्वादिप्रत्ययोत्तरत्वे प्रत्ययस्थले ऽन्वयः संगमनीयः। ननु तथापि नी-
लोत्पलत्वगुणकर्मान्यसत्त्वमित्यादिकर्मधारयोत्तरभावप्रत्ययस्थले विशिष्टस्यानतिरिक्ततया नीलोत्पलत्वेतरणाद्यस-
मवेतत्वस्य नीलविशिष्टोत्पलत्वादेर्बाधादनन्वयप्रसंगः। अथ तदितरासमवेतत्वस्यान प्रवेशः। किंतु नीलाभिन्नोत्पल-
वृत्तिनीलोत्पलनिष्ठान्योन्याभावप्रतियोगितावच्छेदकेतरदित्येवान्वयबोधः। तादृशेतरत्वरूपेण पूर्वपदार्थविशिष्टो-
तरपदार्थतावच्छेदकमेव कर्मधारयपदोत्तरभावप्रत्ययो बोधयति। नान्यदिति समभिव्याहारव्युत्पत्त्यैव द्रव्यत्वनीलोत्पलत्व-
विशिष्टद्रव्यत्वादेरप्रत्ययः। तादृशस्थले प्रकृत्यर्थवृत्तित्वस्यापि पदार्थैकदेशप्रत्ययार्थे प्रकारतया भानाभ्युपगमाद्वान्वयिताव-
च्छेदकावच्छिन्नप्रतियोगिताकत्वव्युत्पत्तिसंकोचेपि रक्तोत्पले नीलोत्पलत्वं नास्तीति व्यवहारोपपत्तिः। नञा प्रकृत्यर्थ-
विशिष्टत्वप्रत्ययार्थतावच्छेदकावच्छिन्नाभावबोधनादिति कर्मधारयोत्तरभावप्रत्ययादाधेयतासंबंधेन पूर्वपदार्थ

उभसिद्धत्वात् उभयवादि

भावप्र-वा. विशिष्टोत्तरपदार्थतावच्छेदकं तादृप्येण प्रतीयत इति सकलोपप्रसंगात् । कन्तद्धिते त्यादि याशिान्यनुशासनव्याख्याताच्चावस्तुगत्याए
वंपदार्थत्वमित्वा विशिष्टस्योत्तरपदार्थतावच्छेदकस्य समभिव्याहारव्युत्पत्त्यात्ततः प्रत्ययेऽप्युत्तरपदार्थतावच्छेदके पूर्वपदार्थ
संबंधस्य तत्राभानादिति लाघवादितरादिषु पंचसु सप्तसु वाभावप्रत्ययस्य शक्तिकल्पने कर्मधारयाद्युत्तरभावप्रत्यय
स्य शक्तिकल्पने कर्मधारयाद्युत्तरभावप्रत्ययस्य पूर्वपदार्थविशिष्टस्योत्तरपदार्थतावच्छेदके निरूढलक्षणाभ्युपगमा
त् । एवं घटवत्त्वमोपगवत्वमित्यादौ तद्धितोत्तरभावप्रत्ययस्यापि पूर्वपदार्थविशिष्टस्योत्तरपदार्थतावच्छेदके घटविशि
ष्टसंबंधोपगुविशिष्टापत्यत्वादौ निरूढलक्षणा विशिष्टत्वं निरूपितत्वसंबंधेन तथा प्रमेयत्वं पचत्वमित्यादि कृत्प्रत्य
योत्तरभावप्रत्ययस्यापि निरूपितविषयत्वादिसंबंधेन पूर्वपदार्थप्रमाविशिष्टविषयत्वपाकविशिष्टकृत्यादौ निरू
ढलक्षणा अन्यत्राधेयतासंबंधेन प्रकृत्यर्थस्य भावप्रत्ययार्थे प्रकारत्वाभावेऽपि कर्मधारयाद्युत्तरभावप्रत्ययार्थे प्रकृत्य एम्०
र्थस्याधेयतासंबंधेन प्रकारतयाभासत एवेतेन प्रकृत्यर्थस्यनान्वय इत्याकूतं ॥ नव्यास्तु इतरत्ववर्त्तमानत्वादिकमपेक्ष्य लाघवा

शुक्लत्वनीलत्वरूपत्वमहत्परिमाणत्वगुरुत्वघटत्वादिजातिरेव भावप्रत्ययशक्यतावच्छेदका आकाशत्वं नीलत्वं महत्त्वं गुरुत्वं इत्या
दौ मुख्यप्रयोगः। प्रकृत्यर्थश्चाधेयतासंबंधेन शुक्लादिविशिष्टप्रकारः घटत्वं पटत्वमित्यादौ नीलोत्पलमित्यादिकर्मधा
रयाद्युत्तरभावप्रत्ययादिस्थले च यथानुभवं लक्षणा च घटत्वपटत्वजातिप्रकारेण कुत्र मुख्यप्रयोगः घटत्वपटत्वमित्यादौ प्रकृ
त्यर्थतावच्छेदकस्य घटपटसंबंधादेरेव तादृग्रूपेण त्वप्रत्ययार्थाद् अन्यथा कृत्तद्धितेत्याद्यनुशासनविरोध इति वाच्यं। तत्त्वमित्यादि
घटादिविशिष्टवाचकतदादिशब्दोत्तरप्रत्ययस्थले एव तेन रूपेण मुख्यप्रयोगात्। न च तथापि शुक्लनीलत्वादीनां घटत्वप
टत्वादीनां च अनंतजातीनां शक्यतावच्छेदकत्वे गौरवात् लाघवादितरत्वादिपंचकानां तत्सप्तकानां वा शक्यतावच्छेदकत्वमे
वोचितमिति वाच्यं। शुक्लत्वादिकं प्रत्येकमादाय विनिगमकचिंतायां शुक्लत्वादिद्विरूपे वलाघवाभावादिति प्राहुरिति समाप्तः त्वप्रत्ययार्थः॥
॥ ॥नमो गणेशाय ॥ ॥यस्यानंतोल्पघने हानिश्चतुर्वर्गश्च पालने। यस्मिन्दृष्टे जगद्दृष्टं स पायात्परमेश्वरः। तत्रेश्वरः शुद्ध
बुद्धस्वभाव इत्यौपनिषदाः। शुद्धो निर्धर्मको बुद्धः स्वप्रकाशज्ञानात्मकः। आदिविद्वान्सिद्ध इति कपिलाचार्याः। आदिवि

ज्ञान् प्रथमत एव विद्वान् चिद्रूपस्वभावाच्चेतनो न तु प्रकृतिवच्चेतनोपरागादौपाधिकी सिद्धिः न तु बुद्धितत्त्वादिवत्साध्यः । तेन कू
टस्थो नित्यो न तु प्रकृतिवत्परिणामी परिणामस्यैव तन्मते साध्यत्वात् । नासतो विद्यते भावो नाभावो विद्यते सतः । इति सां
ख्यसिद्धान्तात् । तेषामुत्पत्तिविनाशौ आविर्भावतिरोभावौ तौ च तादृप्येणादृश्यत्वाद् दृश्यत्वे आदौ सर्गादौ विद्वान् सिद्धो योग
सिद्धिसमुपार्जिताणिमाद्यष्टसिद्धिमान् इत्यर्थः । चिद्रूपस्वभावाच्चैतन्यं न तु ज्ञानवत्त्वेन तत्स्यात्मान्तरसाधारणात् स्मर
ति च सर्गादावादिविद्वाननुभवन्नकपिलोपमहामुनिर्धर्मविज्ञानैश्वर्यैः प्रादुर्बभूवेति । कपिलस्येश्वरात्मकत्वात् । सि
द्धानां कपिलश्चास्मीति भगवद्वाक्यात् । क्लेशाः कर्मविपाकाशयैरपरामृष्टो निर्माणकायमधिष्ठाय संप्रदायप्रद्योतको
ऽनुग्राहकश्चेति पातञ्जलाः । क्लेशा रागद्वेषमोहाः कारणो कार्योपचारात् कर्माणि धर्माधर्मनिदानं विहितनिषिद्धयागहिं
सादिविपाकाः सुखदुःखभोगाः फलपर्यन्तमासेरन्त इत्याशयो धर्माधर्मौ तैरपरामृष्टोऽसंबद्धः शरीरैकसाध्ययदा
दिकर्मनिर्मासिर्थं कायो निर्माणकायः संप्रदीयते गुरुणा शिष्यायेति संप्रदायो वेदः स चानादिर्भगवता प्रद्योतितेऽत्र

नुग्राहकोघटादिनिर्म्माणशिल्पद्वाराप्रथमतोभगवानेवकुलालादिकर्म्मशिक्षयतीतिश्रुतेः। उपास्यत्वेनदेशितइतिमीमांस
काः। नतुवास्तविकः सर्वज्ञः इतिसौगताः। दिगंबरइतिदिगंबराः। लोकव्यवहारसिद्धइतिचार्वाकाः। शिवइतिशैवाः। पुरुषोत्त
मइतिवैष्णवाः। पितामहइतिपौराणिकाः। यज्ञपुरुषइतियाज्ञिकाः। सर्वज्ञःसर्वकर्त्तासर्वविषयकनित्यज्ञानेच्छाकृतिमा
निति नैयायिकाः। वैशेषिकाश्च। तदुक्तंकुसुमांजलौ किंबहुना कुलालाअपियंविश्वकर्म्माणमुपासतेतस्मिन्नेवंजातिगोत्रप्रव
रचरणकुलधर्म्मादिवदासंसारंविदितानुभवेभगवतिसंशयएवनास्तिकुतस्तन्निरूपणीयंतथापिन्यायचर्चेयमीशस्यव्य
पदेशभाक्। उपासनैवक्रियतेश्रवणानंतरागता। श्रुतोहिभगवान्द्रष्टाश्रुतिस्मृतीतिहासपुराणादिभ्यइदानींमंतव्योभवति
श्रोतव्योमंतव्यइतिश्रुतेः। मानाभावादीश्वरएवनास्तिकैचकथातस्यनित्यज्ञानादिमत्वेइतिमीमांसकाः। तत्रविप्रतिपत्तयः। आ
त्मत्वंजीवभिन्नवृत्तिनवाजीवभिन्नज्ञानादिमन्नवादितिति। सकर्तृकानवेत्यादि। तत्रादीति सकर्तृकाकार्यत्वात्घटवदित्यनुमा
नातक्षितौसकर्तृकत्वादिसिद्धौअस्मदादिकर्तृकत्वबाधादतिरिक्तकर्तृकत्वसिद्धिः। सकर्तृकत्वंचापरोक्षज्ञानेच्छाकृतिम

ई॰श्व॰वा॰ जन्यत्वं ज्ञानाद्येकैकव्यक्तिमज्जन्यत्वं वा ज्ञानादिकं च विशेषणं अतोऽस्मदादिना न [illegible] सिद्धसाधनं अर्थान्तरं वा इति पूर्वं अस्मदा
देः सत्वेपि तदा तत्र ज्ञानादेरसत्वात् विनाशरीरमस्मदादीनां ज्ञानायोगात् । अपरोक्षज्ञानेच्छाकृतिजन्यत्वं वा सकर्तृकत्वं हि
ति एवं ज्ञानादिसिद्धौ तदाश्रयतया ईश्वरसिद्धेरप्रत्यूहत्वात् । कार्यत्वं च प्रागभावप्रतियोगित्वं कृतिसाध्यत्वमिति ना
सिद्धिः प्रागभावत्वं च भविष्यतीति प्रतीतिविषयोऽखण्डोपाधिरूपः जन्यत्वरूपकार्यत्वमेव वा तच्च नातो दृष्टान्तदार्ष्टांगोभया
संग्रहः इति अद्य भविष्यतीति प्रतीते वर्तमानकालोत्तरकालोत्पत्तिकत्वविषयकत्वेनैवोपपत्तौ प्रागभावे न मानं न च भवि
ष्यतीति प्रतीतेरुत्पत्तिविषयकत्वमसिद्धं प्रागभावानभ्युपगमे कालेपि विनोत्पत्तिविषयतां भविष्यतिप्रतीतेरनिर्वाहात् तथाहि
भविष्यत्वं यदि वर्तमानप्रागभावप्रतियोगित्वं तदाद्य भविष्यतीति गेहे इत्यादौ देशकालयोः प्रागभावेनान्वयः प्र
तियोगिनो वा आद्ये श्वोभाविन्यद्य भविष्यतीति प्रसंगात् । अद्य च वर्तमानो यः प्रागभावस्तत्प्रतियोगित्वस्य श्वोभाविनि एम॰
घटे सत्वात् । न द्वितीयः अद्य भविष्यतीत्यादौ प्रतियोगिवाचकपदाभावात् । अध्याहार्यमिति चेत् तथापि गेहे भूत्वा प्राग ११

नेगमिष्यतिघट इत्यत्र प्रागनेभविष्यतीति धीप्रसंगात् प्रागनप्रवृत्तिघटे वर्त्तमानप्रागभावप्रतियोगित्वस्य सत्वात्। प्रति
योगिनि प्रागभावे चोभयत्रापि देशकालयोरन्वयोऽतो नोक्तदोष इति चेन्न। तथा सत्यग्रिमक्षणे घटो भविष्यतीति प्रतीत
त्यनुपपत्तेः प्रतियोगिप्रागभावयोरेकक्षणावृत्तित्वात्। अतो वर्त्तमानप्रागभावप्रतियोग्युत्पत्तिकत्वमेव भविष्यत्वं देश
कालयोश्चोत्पत्त्यावन्वय इति वक्तव्यं तथा च वर्त्तमानकालोत्तरकालोत्पत्तिकत्वमेव भविष्यत्वमास्तां किं प्रागभावेन न
हि भविष्यतीति प्रत्ययातिरिक्तस्यांतरेणेह घट प्रागभाव इति प्रत्ययः सचेत्सार्वत्रिकत्वं तत् सर्वत्वमपि ध्वंसघटितमि
ति चेन्न वर्त्तमानप्रागभावप्रतियोगित्वस्य वर्त्तमानप्रागभावप्रतियोग्युत्पत्तिकत्वस्य वा भविष्यतीति विषयत्वेनानुभवसि
द्धत्वेन प्रागभावस्यापलापासंभवात्। तदुक्तमाचार्यैः व्याख्याकोऽप्यलं हि तत्तथा यदनुभवोऽपि व्याख्यायकथ्यते। इति अस्तु
वानुत्पन्निमत्त्वं विनाशित्वं सदातनत्वात्यंताभाववत्वं सदातनभिन्नत्वं वा सकर्तृकत्वे लिंगं उत्पन्नेरंतीद्रियतया लौकिकप्र
त्यक्षाभावेपि अलौकिकप्रत्यक्षत्वानपायात्। सर्वकालवृत्तेरेव सदातनत्वात् प्रागभावानंगीकारेणाव्यभिचारविरहात्। अ

ई.ख.वा.

पजन्याभावत्वं ध्वंसत्वं जन्यत्वं च प्रागभावप्रतियोगित्वमत्यय एव निर्वक्तुमशक्यत्वात् । न प्रागभावहानिः प्रागभावत्वं च विना
श्यभावत्वमित्यन्योन्याश्रयश्चेति चेन्न ध्वंसकारणानुगतमतेऽस्याखंडोपाधिरूपत्वात् ध्वंसत्वस्य ध्वंसस्वरूपतासिद्धांतनयेपि
ध्वंसपदवाच्यत्वे तत्पाध्वंस इति प्रतीतिविषयत्वेन चाननुगमाच्च । एवमत्यंताभावत्वान्योन्याभावत्वं ऽखंडोऽपाधिरननुग
तप्रतीतेर्बाधकं विनाऽननुगतधर्मविषयत्वात् न तु सदातनसंसर्गाभावत्वमत्यंताभावत्वं पटो नास्तीत्यादिप्रतीतेः सदा
तनत्वाद्यविषयीकरणात् । अन्यथा रूपत्वादेरपि वक्तृमात्रग्राह्यत्वरूपतास्यात् । अननुसंहितोपाधिरनुगतप्रत्यया
योगश्च समानः । तन्नयसाधारणस्य संसर्गाभावत्वस्यैक्याभावाच्चान च संसर्गारोपजन्यप्रतीतिविषयाभावत्वं संसर्गश्चता
दात्म्येतरसंबंध इति नातोऽन्योन्याभावसाधारण्यमिति वाच्यं प्रतियोगिसंसर्गारोपस्य प्रतियोगितावच्छेदकसंबंधेन प्र
तियोग्यारोपस्य वाऽभावधीहेतुत्वे मानाभावात् । अनाहार्यारोपस्य प्रतिबंधकत्वात् । आहार्यारोपस्य विनेच्छामभावात् एम०
न च नियतो निषेधस्य त्वेऽर्थ्यसामग्रीतद्धीत्व साधनत्वादिज्ञानविरहात् मानाभावात् । घटध्वंसप्रागभावप्रतियोगिविशे १२

मत्वाभूतत्ववच्छेदकत्वविरहवत् । ध्वंसादेः प्रतियोगितावच्छेदकसंबंधत्वस्याभावाच्च । एकसंबंधे प्रतियोगिमति संबंधांत
रेणोत्यंताभावप्रतीतिवत् ध्वंसप्रागभावप्रतीत्यभावात् । अत एव अन्योन्याभावस्यनतादात्म्यप्रतियोगितावच्छेदकसंबंधप्र
तियोगितावच्छेदकतावच्छेदकसंबंधस्तु तस्यवन्नेतत एव संयोगेन वह्निमति समवायेन वह्निमति भेदसत्वात् प्रसक्तं हि प्रतिसि
द्ध्यत इति प्रवदते वेदे न धर्ममात्रेणावाप्रान्तस्येव निषेधान्तन्मात्रपरस्तथैव मीमांसकसिद्धांतात् तादात्म्यसंबंधावच्छि
न्नप्रतियोगिताकत्वमपिनान्योन्याभावत्वं ध्वंसस्य चान्योन्याभावस्यापि संबंधप्रतियोगितावच्छेदकत्वे मानाभावात् । सं
बंधांतरेण प्रतियोगिसति संबंधांतरेणाभावप्रतीतितो नाभावस्य संसर्गप्रतियोगितावच्छेदककत्वं न चैवं ध्वंसोऽन्योन्याभा
वप्रागभावो वेति । समवायेन कपाले घटो भविष्यतीति संयोगेनेत्यादि प्रतीतेः । प्रागभावस्यापि संबंधप्रतियोगितावच्छेदकत्व
ति चिंतनीयं तावदन्यतमत्वभावकार्यत्वं प्रतियोगिनिवेशितमित्यपि वदंति । न च द्वितिजनकादृष्टजनकास्मदादिकृत्यासिद्ध
साधनं । तज्जनकादृष्टजनककृतेतज्जनकत्वे मानाभावात् । अन्यथा तंदुलादिक्रमणानुकूलकृतेः स्वर्गजनकादृष्टजनक

कृतेरपिपाकादिजनकत्वंस्यात्‌तत्कालेपिपठतिपाकंकरोतीत्यादिप्रत्ययःस्यात्‌।अथमास्तुसिद्धसाधनमर्थांतरंकथंनिवा
र्य्येतिचेत्‌साक्षाज्जन्यत्वस्यविलक्षणादितिमूलस्यतात्पर्यजन्यत्वंतद्व्यवहितएवंकृतमितिव्यापकतानेकिंतुयत्नजन्यत्वंतादात्म्य
नयत्नाजन्यत्वंतत्रविषयतयाकृतिरितिव्यापकताघटितजनकतानिरूपितजन्यतानिवेशात्‌अर्थांतरंक्षितिजनकादृष्टजनका
स्मदादिकेतेवदृष्टजनककर्म्मणोचारत्वात्‌नविषयतयाक्षित्यादिकार्य्येप्यजनकत्वमितिचचोद्धाधिकारव्याख्यानेनव्याः।
तत्वित्वंस्वर्गजनकादृष्टजनकयागादिजनककृतेरुद्देश्यत्वेनस्वर्गविषयत्ववत्‌।क्षितिजनकादृष्टजनककर्मानुकूलकृतेर
प्युद्देश्यतयाक्षितिविषयत्वेनादृष्टजनककृत्यादर्थांतरस्यदुर्वारत्वात्‌नचकार्य्यजनकादृष्टजनककृतेर्विषयतयाकार्य्यादि
व्यापकत्वेपिनसाक्षाद्व्यवहितएवंकालसत्वमपित्यतिकारणत्वाभावान्यस्मदादिकृतिजन्यत्वमादायार्थांतरत्तेतिवाच्यंअस्म
दृष्टद्वारैवास्मदादिकृतेः पूर्वसत्वघटितकारणत्वसिद्धावर्थांतरतापत्तेः साध्यत्वाव्यविषयतयाव्यापकत्वघटितजनकत्व एम॰
निरूपितजन्यतारूपसाक्षाज्जन्यत्वप्रवेशेपफलेव्यभिचारात्‌।तस्यपक्षसमत्वेपिअसिद्धेः॥अत्रोच्यते।यागादेःस्वर्गजनकता १३

र्यां व्यापकतानापूर्वसंबंधघटितास्वर्गस्यादेशविरोधेऽत्पत्तिनियमार्थं स्वर्गयागयोः समवायेन प्रतियोगित्वे यधिकरणत्वघ
टितव्याप्यभ्युपेयं देशिकव्यापकतासत्वेनापूर्वद्वारकालिकव्यापकतावैयर्थ्यात्। किंत्वव्यवहितपूर्ववृत्तितामेवापूर्वानु
प्रवेशः। तथा चापूर्वद्वारफलाव्यवहितपूर्ववृत्तित्वघटितजनकतयाः कृतौ सत्वेपि अत्र साक्षात्फलाव्यवहितपूर्ववृत्तित्वघ
टितजनकतानिरूपिताजन्यताया विवक्षणान्नार्थांतरत्वमिति एतेन साक्षात्कृतित्वं न तज्जन्यजन्यत्वे सति तज्जन्यत्वं अवच्छे
हेतुत्वे तेजन्यसत्वेन तत्तिजनकसंयोगादावपि हेतुत्वात्। तादृशार्थंतासिद्धेश्च कुलालादिकृतेश्चक्रसंयोगादिद्वारैव घटादिहेतुत्वादि
ति परास्तं। साक्षादव्यवहितपूर्वकालवृत्तित्वघटितजनकतानिरूपितजन्यताया एव साक्षात्जन्यताशब्दार्थत्वात्। घटादेर्दृष्टं
तायोगेतु चेष्टेव दृष्टांतो नचतत्र व्यभिचारः घटादेरपि पक्षसत्वात्। अथादृष्टद्वाराव्यवहितपूर्वकाले सत्वमव्यवहितपूर्वका
लसत्वमितिचेन्न। यत्रादृष्टद्वारा हेतुत्वं तत्राव्यवहितपूर्वकालसत्तोऽत्रत्वस्याव्यवहितपूर्वकालसत्वस्यैव निवेशात्। नहि व्या
पारमात्रसत्वे इदानीं व्यापारीतिप्रतीतिरानुभविकी। अदृष्टस्य वृत्तितानियामकत्वविरहे सातेन संबंधेन व्यापकत्वस्या

ई॰ बा
15

ण्यभावाच्च। कालिकसंबंधेन कारणत्वे घटः कव्यापकताच्चन यत्नाकार्य्यं। तदुत्पत्तिर्वा तत्कारणमित्याकारिका पूर्ववर्त्तितामा
त्रेण हेतोरभावात्। किंतु यदा कार्य्योत्पत्तिस्तदव्यवहितपूर्वक्षणे कारणमित्याकारिका तच्च कार्य्योत्पत्तेरव्यवहितपूर्वकाल
त्वस्य तेन संबंधेन कार्य्यस्यैव वा समानाधिकरणो यः कालिकसंबंधावच्छिन्नाभावस्तत्प्रतियोगितानवच्छेदकत्वे पर्य्यवस
न्नं दैशिकेन संबंधेन इत्यादौ ज्ञानादिव्यापकत्वसत्त्वेपि न तत्पूर्वकालसत्त्वं ~~ज्ञानसंबंधेन कार्य्यस्यैव वासः~~ कालिकव्या
पकतागर्भायाश्च कारणताया न पूर्ववृत्तित्वात् तद्गर्भीवोवैयर्थ्यादिति निपुणमवलोकनीयं स्वर्गं प्रति अपूर्वस्य कारणतायां दै
शिकव्यापकता निवेशो कालिकविशेषणतामात्रेण पूर्वसत्त्वानिविष्टा स्वर्गं प्रति यागस्य कालिकतया कारणत्वे तु स्वर्गका
रणतापूर्वकारणत्वमेव स्वर्गकारणत्वं। ननु एवं संबंधेन स्वर्गं प्रति यागस्य व्यापकत्वं वृत्यनियामकसंबंधस्य प्रतियोगि
तानवच्छेदकत्वेन दूषितत्वात्। एवं च व्यापारजनकतावच्छेदकमेव रूपे तान्यत्वादिकं स्मृतिजनकतावच्छेदकं न तु फलव्या ग्रम॰
पारो प्रतिव्यापारिणोऽन्यथाहेतुत्वमिति प्राचीनमेवोक्तं साधुतरमिति ध्येयं। अन्यं प्रति पूर्ववर्त्तित्वग्रहे हि त्वे वयं प्रति पूर्व १४

वेदवन्नित्यग्रह इत्यन्यथासिद्धौ फलानुगुणत्वेनान्यद्विशेषणात् । स्वर्गे नियत एव वेदवन्नित्यस्य स्वर्गकारणात्तया स्वर्गोन्य एवं वेद
न्नित्यत्वमङ्गीकृत्य स्वर्ग एव वेदवन्नित्यग्रहाभावात् । अपूर्वजनकत्वेन यागस्य स्वर्गजनकत्वात् इति । अदृष्टजनकजन्यकृत्यजन्यत्वे
सति जन्यत्वं साध्यं । अजन्यत्वात्तस्य परमतेऽव्याप्तिविरहेण पञ्चजनकत्वानुपायात् । व्यापके व्यर्थविशेषणात् । विरहाच्चेत्यपि केचि
त् । समानाधिकरणादृष्टजनककृतिजन्यत्वं साध्यं इत्यन्ये । किं तु यजेत न हिंस्यादित्यादिनायागहिंसादेः क्रियायामेवेष्टानिष्टसा
धनत्वं श्रुत्या बोध्यते । तच्चासाध्यादनुपपन्नमिति । अपूर्वं द्वारत्वे एवं साधनत्वं यागादौ न तु ज्ञानेच्छाकृतीनामदृष्टजनकत्वं मानाभा
वात् । इच्छाविशेषस्य यागादेस्तथात्वेपि ज्ञानकृत्योरतथात्वात् । कृतीष्टसाधनताबोधस्य विधिनिरस्तत्वात् । न चानुत्पादितक्रि
यायामपि परहिताथेत्वसंधानपरहितो यज्ञमवाधकमादीनां स्नानादिविशेषाणां स्वर्गजनकत्वस्य श्रुत्याबोधनात् । अदृष्टद्वा
रा जन्यत्वेनार्थांतरं । स्वर्गजनकजनकादृष्टजनककृतिहितत्वादिजनकत्वे वा बाधात् । तस्याः क्षितिजनकत्वे मानाभावात् । अन्यथा ध्वं
सद्वाराख्यानरत्वसंबंधेन वा स्वप्राणानिषिद्धकृतिमात्रजन्यतासिद्ध्यर्थांतरतापत्तेर्दुर्वारत्वात् । अदृष्टद्वारापूर्वत्वानुधावनेनो ।

दी॰ का॰ चित्वात् उत्पाद्कुः। यद्वा ज्ञानादेरुपादानगोचरत्वं वक्तव्यं। नातो दृष्टद्वारणार्थं तदा ताद्दृशीतिजनकादृष्टजनककृतेः क्षित्युपादानगोच
15 रत्वाभावात्। न च यथा कथंचिदुपादानगोचरत्वस्यापि प्रसक्ततया अदृष्टद्वारणार्थं तदा वारकत्वात्। स्वोपादानगोचरत्वं स्वत्वाननु
गमादननुगतमिति क्षित्युपादानगोचरत्वस्य विवक्षणे तु साध्याप्रसिद्धिर्व्यभिचारो दृष्टांतासिद्धिर्वेति वाच्यं। कार्यत्वावच्छिन्नं प्र
ति ज्ञानेच्छाकृतीनामेकार्थप्रत्यासत्या हेतुत्वात्। यत्र समवायेनाकार्यं तत्र विषयतया ज्ञानमिच्छाकृतिर्वेति व्यापकता शरीरत्वाभा
येवोपादानगोचरत्वकथनात् उक्तयैवोपादानगोचरणपरोक्ष ज्ञानेच्छाकृतिजन्यत्वसाध्यत्वे व्यभिचारवारणाय भावत्वेन वा विशे
षितं कार्यत्वं उत्पत्ति चिंतामणिप्रभृतिमतमपास्तं समवायेन संबंधावच्छिन्न जन्यत्वस्य हेतुत्वेन व्यभिचारानवकाशात् तादृशकार्य
कारणाभावस्यैवात्रानुकूलतर्कत्वात् समवायसंबंधावच्छिन्नप्रागभावप्रतियोगित्वमेव समवायेन कार्यत्वं उद्ध कपाले समवायेन
घटो भविष्यति न संयोगेनेति प्रतीतेः प्रागभावस्यापि संबंधावच्छिन्नप्रतियोगित्वाद्वित्यस्याकुः। सर्वमिदं साक्षात्परंपरासाधारणस्य एम॰
जन्यत्वस्यातिरिक्तत्वमते संगच्छते कृतिजन्यत्वादिकं साध्यं। अन्यथा तु जन्यत्वस्य जनकताघटितत्वात्। सामान्यतः कार्यमात्रघटितत्वा १५

पकतायाः कृत्यादौ तदवच्छेदकत्वस्यवाकृतिरसिद्धतयासाधनायोगात्। घटादिकार्य्यविशेषघटितव्यापकत्वादेः कृत्यादौप्रसिद्धंप्रति
घटितव्यापकत्वादेरसिद्धेः प्रसिद्धविशेषस्यसाध्यत्वेव्यभिचाराच्च कालिकसंबंधेनकृतिमदन्यस्मिन्कालिकसंबंधेनावृत्तित्वरू
पंकृतिसाध्यत्वंदृष्टांतेघटादावसिद्धं विषयतयाकृतिमदन्यस्मिन्समवायेनतादात्म्येनवाऽसंबंधत्वरूपमपिकृतिसाध्यत्वंनैया
यिकनयेऽप्रसिद्धंचईश्वरकृत्यादेः सर्वविषयकत्वात्। तथापिसाध्यत्वाव्यविषयतयाज्ञितिः स्वाव्यवहितपूर्वंकृतिकाकार्य्य
त्वात्। ज्ञित्यव्यवहितपूर्वकालकृतिमानकार्य्यव्यवहितपूर्वकालत्वात्कालत्वाद्वाघटाव्यवहितपूर्वकालंचतदुत्पादिकंचोर्ध्वानच
कार्य्यत्वंनकर्तृज्ञाना--जन्यतावच्छेदकंकिंतुघटपटत्वादिकमेवेतिवाच्यं। घटत्वादीनाम—तत्वेनलाघवेनजन्यत्वस्यैवकर्त्रा
दिकार्य्यतावच्छेदकत्वात्। शरीरजन्यत्वंकर्तृज्ञानादेश्चकार्य्यतावच्छेदकंनजन्यत्वमात्रमितिचेन्न। अन्यथासिद्धतयारूतज
न्यत्वेनजन्यत्वायोगात्। शरीरजन्यत्वापेक्षयाजन्यत्वस्यलघुत्वाच्चाजन्यत्वमपिनैकमितिचेन्न। तस्याननुगतस्योक्तत्वात्। घटत्वाद्य
वच्छिन्नंप्रतिकपालादिगोचरज्ञानत्वेनकेवलज्ञानत्वेनवाहेतुत्वेप्याघघटादिसंतानानांत्वदयघटादीनांचकर्तृत्वेनघटत्वादि

ई॰वा हेतुनापि ईश्वरासिद्धेरप्रत्यूदत्वात्। इति बौद्धाधिकारव्याख्यानेन विधानाच्चात्र आरम्भकसंयोगनाशस्य द्व्यणुकादेः क्षणिकत्वाप
16 त्यतिप्रसंगभिया सामान्यतो द्रव्यनाशो हेतुत्वात्। स्वोपध्वायकतन्तुसंयोगव्यक्तिनाशस्य तत्तद्व्यक्तित्वेन तत्र द्रव्यनाशस्य हेतु
त्वात्। न खंडघटप्रत्याशान्तिति द्व्यणुकसंतानः खंडघटादिशंकर्णादिकं परमाणुद्वित्वादिकमपि पक्षः। न चैकस्य पक्ष
त्वे अन्यत्र संदिग्धानैकान्तिकता सर्वसाधारणस्य पक्षतावच्छेदकस्यैकस्याभावेन पक्षातिरिक्ते व्यभिचारसंशयादिति
वाच्यं तेषां पक्षसमत्वात्। तदुक्तं न हि पक्षे पक्षसमे वा व्यभिचारः। पक्षसमत्वं च संदिग्धं साध्यत्वं निश्चितसाध्याभाव
वति हेतोर्वृत्तिता संशयस्यैव व्यभिचारसंशयत्वात्। एकदाना नैव वा पक्षतावच्छेदकं जन्यमात्रं वा पक्षः पक्षतावच्छेदका
वच्छेदेन साध्यसिद्धेरुद्देश्यत्वान्नांशतः सिद्धसाधनं तावदन्यतमत्वं सबुद्धिविशेषविषयत्वं वा संदिग्धकर्तृकत्वं वा
पक्षतावच्छेदकमिति। अन्ये तु अदृष्टाजनककृतिजन्यभिन्नं स्वजनकादृष्टाकृतिजन्यभिन्नं जन्यं वा पक्षः। स्वत्वपर्दं च गंगा एम॰
स्नानादावंशतः सिद्धसाधनादिवारणाय। उत्पन्नानुमानखंडे प्राहुः। विवादाध्यासितकर्तृकत्वेन पक्षो विवादस्य सकर्तृक १६

त्वेन मीमांसकानामित्येवोऽर्थः। यत्त्वन्वितित्वावच्छेदेन पक्षत्वे नित्यबोधः। तत्समानाधिकरण्येन पक्षत्वे घटादौ सिद्धसाध
नमिति तदापि न क्षितिपदे न सर्गाद्यकालीनोत्पन्नद्रव्यस्यैव पक्षत्वात्। न वा बाधो न वा सिद्धसाधनमिति। अथात्र शरीराजन्यत्वमुपा
धिः। तेन क्षितिरकर्तृका शरीराजन्यत्वादिति सत्प्रतिपक्षः। तद्व्यभिचारेणास्य व्यभिचारो वेति न च स्वरूपासिद्धिरनेकत्वेपि व्याप्यत्वा
हकतया शरीरविशेषोपाधेरणस्य व्यर्थत्वेन व्याप्यभावादसमर्थविशेषणत्वेनैवमिति वाच्यं नीलधूमादौ व्यर्थविशेषणत्वेपि व्याप्ते
रनपायात्। धूमत्वघटितव्याप्तितो नीलधूमत्वघटितव्याप्तेरप्यन्यत्वात्। विना नीलविशेषणं तादृशव्याप्तिग्रहायोगेन तस्य सा
र्थकत्वाच्च। अत्राधिक्येन निग्रहस्थानम् इति चेन्न तस्य पुरुषदोषतया परिभाषामात्रत्वादुक्तहेतोरभावात् व्यतिरेकिमुद्रयात्र चैवं सा
ध्यांगमकत्वे वैयर्थ्याभावाच्च यत्र सकर्तृकत्वं तत्र शरीराजन्यत्वमिति तस्य व्यापकत्वात्। व्यतिरेकिणा अनुमित्यनंगीकारेऽपि
अर्थापत्तिविधयापि सत्प्रतिपक्षत्वादेः संभवात्। शरीरत्वं च चेष्टाश्रयत्वं इन्द्रियाश्रयत्वं वा चेष्टा इष्टाश्रमः शरीरमिति न्यायसूत्रा
त्। चेष्टात्वं च जीवत्शरीरे क्रियाविशेषगतो जातिविशेषः प्रयत्नजन्यतावच्छेदकः शरीरे क्रियायां चेष्टा इति आचार्य्यणाभा

ई॰वा॰

17

प्यव्याख्यानात्। न च मूर्त्तत्वं दृशरीरव्याप्तिः चेष्टास्वरूपयोग्यत्वस्य विवक्षितत्वात्। दंदत्वादिवद्वयवसंयोगादिगत एकत्र मतो वाजा
ति विरोधः। शरीरत्वं चेष्टाजनकतावच्छेदिकावयविमात्रवृत्तिजातिः सा च चैत्रत्वमैत्रत्वादि इति वर्द्धमानोपाध्यायाः अन्य
त्र चेष्टा इति प्रतीतेरयोगात्॥ इति चेन्न समवायेन कार्य्यत्वावच्छिन्नं प्रति तादात्म्येन कार्य्यत्वावच्छिन्नं प्रत्येव वा विषयतया ज्ञा
नेच्छाकृतीनां हेतुत्वमित्यनुकूलतर्कबलेन हेतोः साध्यव्याप्यत्वसिद्धौ साध्यव्याप्यहेतोरव्यापकत्वेन उपाधिः साध्याव्यापक
त्वात्। शरीराजन्यक्षित्यादिपक्षत्वे सत्प्रतिपक्षत्वसंभवे पि अस्मदाद्यकर्त्तृकानां शरीरावयवसंयोगादीनां चेष्टाजन्यानां सु
खदुःखधर्म्माधर्म्मसाक्षात्काराणां कार्य्यत्वेन ईश्वरासिद्धौ बाधकाभावात्। शरीराजन्यत्वेन सत्प्रतिपक्षासंभवात्। सकर्तृक
त्वानुमानसंभवात् इति तु बौद्धाधिकारव्याख्यानेन व्याः। तत्त्विंत्या सत्प्रतिपक्षासंभवे पि व्यभिचारानुमानसंभवात्। अ
त एव साक्षात्प्रयत्नाधिष्ठेयजन्यत्वमपि नोपाधिः शरीरे साक्षात्प्रयत्नाधिष्ठेयमित्यनियमात्। प्रयत्नेन यन्निष्ठक्रि एम०
याद्वारा व्यापारद्वारा वा कार्य्यत्वात्। पाद्येतेतस्यैव साक्षात्प्रयत्नाधिष्ठेयत्वे साधनव्यापकत्वात् ईश्वरकृत्या परमाणुक्रिया ७

द्व्यणुकादिजननात्। परमाण्वादेरपि साक्षात्प्रयत्नाधिष्ठेयत्वात्॥ शरीरकर्तृकत्वमपि नोपाधिः कार्य्यमात्रकर्तुः श
रीरसहकारित्वाभावात्। न हि जन्यत्वावच्छिन्नं प्रति अस्मदादिकर्तृत्वेन कृतित्वादिना च हेतुत्ववत्। भवतामपि मीमांसकानां शरी
रत्वेन हेतुत्वं क्षित्यादौ व्यभिचारस्य च क्षायितत्वात्। कृतिजन्यतत्वमेव शरीरजन्यतावच्छेदकमिति चेन्न। कृतिजन्यतावच्छेदकं य
दि जन्यत्वं क्षित्यादौ व्यभिचारः कृतिजन्यतावच्छेदकं यदि जन्यत्वं क्षित्यादौ व्यभिचारः कृतिजन्यत्वेन शरीरजन्यत्वमति प्रसक्तस्यानव
च्छेदकत्वात्। ईश्वरासिद्धेः प्रत्यूहत्वाच्च। अथ घटादिकं कृतिजन्यतावच्छेदकं तर्हि तदेव शरीरजन्यतावच्छेदकमस्तु किं कृतिजन्यत्वे
न अथ जन्यत्वं प्रागभावप्रतियोगित्वं तदङ्गीकारे ध्वंसप्रतियोगित्वं वा प्रागभावत्वादिकं चाखण्डोपाधिरिति सिद्धान्तविरुद्धः। अभा
वत्वप्रागभावत्वादेः स्वरूपानतिरिक्तत्वसिद्धान्तात्। तादात्म्येन बाधाधेयभावेनावाच्यक्षणेनैव तत्वस्यासत्वात्। इत्थं च प्रागभावप्रति
योगित्वस्य तत्तद्व्यक्तिविश्रान्ततया तद्व्यक्तिमेव कर्तृत्वेनादेश्यकार्य्यतावच्छेदकं तत् कथं क्षितिकर्तृकत्वसिद्धिरुभयसिद्धस्य क
र्तृव्यक्तेरेव तत्तद्व्यक्तित्वेन कर्तृजन्यत्वात् कृतिजन्यत्वाच्च लाघवात्। सिद्धान्तमनादृत्य स्वत्वस्यैवाखण्डत्वं प्रागभावत्वादेर्जन्यत्व

ई॰वा॰

१८

स्यवात्स्वीकारेचउभयसिद्धसकर्तृकव्यक्तिनिष्ठतयास्वीकारेएतेनैवज्ञानादिजन्यतायांलाघवात्।अतिरिक्तस्येईश्वरस्यतत्र
ज्ञानेच्छाकृतीनांतेनमूर्त्तसंयोगादीनांचकल्पनागौरवात्।एवंखंडघटादौव्यभिचारःघटत्वावच्छिन्नप्रतियोगिताकध्वंसत्वादि
नाहेतुत्वंतथाज्ञानेच्छाकृतित्वादिनापिवस्तुतस्तुघटएकमात्रस्यकृतिरुघटादेरपिनाशकत्वापत्तेः ~~अवय~~ विनाशंप्रतिद्र
व्यनाशंप्रतिवाअवयवसंयोगनाशस्यारंभकसंयोगनाशत्वेनविजातीयसंयोगनाशत्वेनवाहेतुत्वंकिंतुद्रव्यनाशंप्रति
स्वोपधायकतत्तत्संयोगनाशत्वेनतत्तद्व्यक्तित्वेनवातथाचअखंडघटप्रत्यागततत्तद्वयवनाशेपिघटाद्यविनाशोत्पत्त्य
भिज्ञावाधितत्वाच्चातत्रघटोनष्टइतिप्रतीतेरभावात्घटोभग्नइतिप्रत्ययस्यावयवसंयोगनाशविषयत्वात्।इतिचेन्न।
उभयसिद्धसकर्तृकेव्यक्तिनिष्ठतत्तद्व्यक्तित्वादीनांकर्त्रादिकार्यतावच्छेदकत्वापेक्षयालाघवाज्जन्यत्वमतिरिक्तंस्वीक
त्यतस्यैवकर्त्रादिकार्यतावच्छेदकत्वंस्वीक्रियते।नचैतादृशकार्यकारणभावस्वीकारेक्षितिकर्तृत्वेनईश्वरस्यतत्र
ज्ञानेच्छाकृतीनांचतत्रमूर्त्तसंयोगादीनांचकल्पनागौरवमितिवाच्यं।एतादृशकल्पनागौरवस्यफलमुखत्वेनदोषत्वा

दोषत्वादिति संक्षेपः।

ग्राम॰ १८

(इतीश्वरवादः) तदिति श्री...ः ॥ नमो गणेशाय ॥ ॥ ननु द्रव्यघटत्वावच्छिन्नं प्रति कनरूपेण हेतुत्वान्नैतावद्द्रव्यत्वेन तस्यैकस्याभावा
त् । न च द्रव्यत्वं जातिर्घटजनकतावच्छेदकतयेति वाच्यं पृथिवीत्वादिना संकरप्रसंगात् । तथा हि पृथिवीत्वं विहाय द्रव्यत्वं स्व
र्णादद्रव्ये द्रव्यत्वं विहाय पृथिवीत्वं घटे पार्थिवद्रव्ये तयोः सांकर्यात् । न च द्रव्ये कत्ववृत्तिजातिविशेषः परंपरया द्रव्यवृत्तिरिति
वाच्यं । रूपादिवृत्तितया विनिगमनाविरहात् । अत्र केचिदाहुः । न च सा जातिः रूपादिवृत्तिर्नीलत्वादिना जातिसंकरप्रसं
गात् । न च रसवृत्तिर्मधुरत्वादिना जातिसंकरप्रसंगात् । न च गंधवृत्तिः सुरभित्वादिना संकरप्रसंगात् । न च स्पर्शवृत्तिः सुकु
मारत्वादिना संकरप्रसंगात् । न च परिमाणवृत्तिः प्रकृष्टत्वादिना संकरप्रसंगात् । न च संयोगवृत्तिरभिघातत्वादिना संकरप्र
संगात् । न चाभिघातत्वं विरुद्धमेवास्तु तथापि [illegible] त्वस्य एकद्रव्यवृत्त्यनंत संयोगादिकल्पनापेक्षया लाघवात् । तदेकत्ववृत्ति
त्वमेवास्तु न पृथक्त्ववृत्तिस्तद्ग्रहेऽवधिज्ञानापेक्षणात् । तादृशजाति प्रति अवधिज्ञानस्यास्वातंत्र्येण हेतुकल्पने गौरवात् ।
न च तत्कार्यतावच्छेदकं पृथक्त्वप्रत्यक्षत्वमेव मत्वादिना पृथक्त्वभानिव्यभिचार इति न च पृथक्त्वस्य एकपृथक्त्व[illegible]कादिवत् प्प

नम्बर १२५० पत्रे १९

दं० टी० प्रकारसंभवात्।तावद्भेदेनकार्यकारणभावकल्पनेतद्दानंत्यंतदपेक्षयापृथक्त्वेनभिन्नासमवेतप्रकारकप्रत्यक्षंप्रतिश्रवणेन्द्रिया
नस्यहेतुत्वमस्तुलाघवात्।तद्वाद्दंडत्वस्यापिप्रत्यक्षविषयत्वेश्वमिलात्तद्ग्रहेणबधिरस्यानस्यस्यातेश्चहेतुत्वेविषमसंदिग्धत्वात्।म मिश्रि
णिकारमतेतदनभ्युपगमात्।दंडत्वाद्यवच्छेदेनकारणताग्रहेतत्पूर्वंतादृशज्ञानेति---तदेकत्ववृत्तिसेवास्तुजातिः।नचास्तुए
कवृत्तिदंडत्वजातिस्वीकारेकोमलदंडादपिघटोत्पत्तिःस्यात्।नचभ्रमिजनकत्वादेवनघटोत्पत्तिरितिवाच्यं।तस्यापाद्यत्वा
त्।तस्माद्देतद्बृहत्वावच्छिन्नंप्रति।तद्दंडत्वेनहेतुतेतिविशिष्येचकार्यकारणभावः।प्रत्यासत्तिस्तुनसंयोगः।तद्दंडानधिकर
णदेशेपितत्सत्वात्।किंतुयद्देशोत्पत्तिसंबंधेनघटः।तद्व्यवहितोत्तरवर्त्तित्वसंबंधेनदंडइतिकालिकीदैशिकीवा।यत्र
तादात्म्यसंबंधेनघटः।तत्रस्वजन्यतासंबंधेनदंडइत्येतादृशविशेषस्वीकारेसामान्येमानाभावइतिवदंति।प्राचीनास्तु।भ्रमि
जनकत्वेनैवदंडस्यहेतुतेति।तन्न।भ्रमिंप्रतिपूर्ववर्त्तित्वेऽन्यथासिद्धत्वात्।घटार्थिनोदंडेप्रवृत्तिश्चप्रथमंभ्रमेरु राम०
पधानानिर्णयात्विनिगमकाभावात्।दंडस्यापिघटजनकत्वेनभ्रमिंप्रतिहेतुत्वेअन्योन्याश्रयात्।केचित्तुएकवृत्ति १९